# Rishigautamaproktam Shivarchanopadesham

# ઋષિગૌતમપ્રોક્તં શિવાર્ચનોપદેશમ્

## Document Information

Text title : Rishigautamaproktam Shivarchanopadesham

File name : shivArchanopadeshamgautamaproktaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 21| 96-135||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિગૌતમપ્રોક્તં શિવાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
ત્રિકાલમપ્રમાદેન શિવમર્ચય યત્નતઃ ।
ગૃહાણ શામ્ભવીં દીક્ષાં મોક્ષાર્થમપિ યત્નતઃ ॥ ૯૬॥

મોક્ષસ્તુ ન ભવત્યેવ વિના શઙ્કરદીક્ષયા ।
સન્યાસયોગો વિજ્ઞેયો યા દીક્ષા શામ્ભવી મતા ॥ ૯૭॥

ત્રિપુણ્ડ્રધારણં કાર્યં લલાટાદિષુ ભસ્મના ।
રુદ્રાક્ષધારણં કાર્યમપ્રમાદેન સન્તતમ્ ॥ ૯૮॥

લિઙ્ગપૂજૈવ કર્તવ્યા કેવલા સર્વસાધનૈઃ ।
વેદાવતંસઃ સતતં જપ્યઃ શૈવઃ ષડક્ષરઃ ॥ ૯૯॥

રુદ્રાધ્યાયજપઃ કાર્યઃ શિવમન્ત્રસમાશ્રયઃ ।
દેવતાસાર્વભૌમો યઃ સર્વદેવશિખામણિઃ ॥ ૧૦૦॥

સ એવ સર્વદા ધ્યેયઃ પાર્વતીરમણઃ પ્રભુઃ ॥ ૧૦૧॥

સદા ભસ્મવતા ભાવ્યં સદા રુદ્રાક્ષધારિણા ।
શ્રૌતરુદ્રાક્ષભસ્મભ્યાં વિચ્યુતઃ પતિતો ભવેત્ ॥ ૧૦૨॥

શૈવપ્રતાનિ કાર્યાણિ તત્તત્કાલેષુ ભક્તિતઃ ।
શૈવવ્રતપરિભ્રષ્ટો ભ્રષ્ટ એવ ભવિષ્યતિ ॥ ૧૦૩॥

દશશૈવવ્રતાન્યાહુર્જાબાલશ્રુતિપારગાઃ ।
તાનિ વ્રતાનિ યત્નેન કાર્યાણ્યેવ દ્વિજૈઃ સદા ॥ ૧૦૪॥

પ્રત્યષ્ટમ્યાં પ્રયત્નેન કર્તવ્યં નક્તભોજનમ્ ।
કાલાષ્ટમ્યાં તુ તત્ત્યાજ્યં ભોજનં યત્નપૂર્વકમ્ ॥ ૧૦૫॥

અવશ્યં સિતભૂતાયાં કર્તવ્યં નિશિ ભોજનમ્ ।
અસિતાયાં તુ ભૂતાયાં તન્ન કાર્યં દ્વિજાતિભિઃ ॥ ૧૦૬॥

એકાદશ્યાં સિતાયાં તુ ત્યાજ્યં ભોજનમાસ્તિકૈઃ ।
અસિતાયાં તુ ભોક્તવ્યં નક્તતમભ્યર્ચ્ય શઙ્કરમ્ ॥ ૧૦૭॥

ત્રયોદશ્યાં તુ ભોક્તવ્યં રાત્રાવેવ પ્રયત્નતઃ ।
શિવલિઙ્ગાર્ચનં કાર્યં સ્વશક્ત્યા યત્નપૂર્વકમ્ ॥ ૧૦૮॥

નિશિ યત્નેન કર્તવ્યં ભોજનં સોમવાસરે ।
કિમુતાન્યેષુ દિવસેષ્વિતિ જાબાલવાદિનઃ ॥ ૧૦૯॥

સસોમા સિતભૂતા યા સાર્દ્રાપાતસમન્વિતા ।
તસ્યામુપોષણં કાર્યં નિશિ જાગરણં તથા ॥ ૧૧૦॥

ભોજનીયઃ પ્રયત્નેન શૈવઃ શક્તિપુરઃસરમ્ ।
વ્રતાન્યેતાનિ નિયમાત્કર્તવ્યાનિ દ્વિજાતિભિઃ ॥ ૧૧૧॥

એતાવન્તઃ શૈવધર્માઃ શિવદીક્ષેતિ ગીયતે ।
શૈવમધ્યે વસ પ્રીત્યા શૈવાન્પોષય સર્વદા ॥ ૧૧૨॥

શૈવાનેવાર્ચય પ્રીત્યા શૈવાનેવ વિલોકયેત્ ।
શિવાલયાનિ યત્નેન કારયસ્વ યથોચિતમ્ ॥ ૧૧૩॥

બહિર્બિલ્વવનાન્યેવ કારયસ્વ પ્રયત્નતઃ ।
બિલ્વપત્રાણિ સતતં ત્વમેવાહર સાદરમ્ ॥ ૧૧૪॥

આહૃત્ય બિલ્વપત્રાણિ પૂજયસ્વ સદાશિવમ્ ।
અનભ્યર્ચ્ય મહાદેવં મા મા ભુઙ્ક્ષ્વ ભ્રમાદપિ ॥ ૧૧૫॥

શિવતીર્થમપીત્વાપિ મા મા ભુઙ્ક્ષ્વ કદાચન ।
કુરુ યત્નેન સતતં મહાદેવનિરીક્ષણમ્ ॥ ૧૧૬॥

કુરુ યત્નેન સતતં શિવમન્ત્રજપં સદા ।
સર્વદા નીલકણ્ઠેતિ મહાદેવેતિ સંવદ ॥ ૧૧૭॥

હૃદિ શઙ્કરમારાધ્યં ધ્યાત્વા સંવસ સર્વદા ।
રુદ્રાક્ષભસ્મના સમ્યગ્ભૂષયસ્વ સ્વકં વપુઃ ॥ ૧૧૮॥

યદા પુત્રા ભવિષ્યન્તિ તદા તાનખિલાનપિ ।
શિવનામાઙ્કિતાનેવ કુરુ યત્નેન સાદરમ્ ॥ ૧૧૯॥

તાનપ્યવશ્યં સમ્બોધ્ય શામ્ભવાન્કુરુ સર્વદા ।
પ્રત્યહં શિવપૂજાયાં નિયોજય નૃપાત્મજાન્ ॥ ૧૨૦॥

યદા તુ ફલદધ્યાદિ ભોક્તવ્યં તે ભવિષ્યતિ ।
તદા સ્તોકં નમઃ સોમેત્યાદિ મન્ત્રાન્પઠ ક્રમાત્ ॥ ૧૨૧॥

'હાવુહાવુહાવુ' ઇત્યાદિ મન્ત્રાન્પઠ તતઃ પરમ્ ।
અઙ્ગુષ્ઠમાત્રઃ પુરુષોઽઙ્ગુષ્ઠં ચ સમાશ્રિતઃ ॥ ૧૨૨॥

ઈશઃ સર્વસ્ય જગતઃ પ્રભુઃ પ્રીણાતિ વિશ્વભુક્ ।
ઇતિ વૈદિકમન્ત્રેણ શિવપાત્રં નિવેદય ॥ ૧૨૩॥

શૈવેભ્યોઽપ્યમુનાન્નાનિ મનુનૈવ નિવેદય ।
તતઃ પરં તુ તત્વાયામીત્યાદિમનુપઞ્ચકમ્ ॥ ૧૨૪॥

પ્રત્યેકં સમનૂદ્યૈવ તતઃ પ્રાણાહુતિં કુરુ ।
તતઃ પરમુમાકાન્તં કવલે કવલે સ્મર ॥ ૧૨૫॥

મધ્યે જલાદિપાનેઽપિ સ્મર સામ્બં મહેશ્વરમ્ ।
સ્મરન્હૃદિ મહાદેવં કુરુ મૌનેન ભોજનમ્ ॥ ૧૨૬॥

વક્તવ્યં યદિ મધ્યે સ્યાત્તદા શિવકથાં વદ ।
ભુઙ્ક્ષ્વ શૈવૈઃ સહાન્નાનિ પિબ શૈવૈઃ સહામૃતમ્ ॥ ૧૨૭॥

વસ શૈવૈઃ સદા પ્રીત્યા યજ શૈવૈઃ સહેશ્વરમ્ ।
શૃણુ શૈવકથાં નિત્યં ઘોરપાતકનાશિનીમ્ ॥ ૧૨૮॥

વદ શઙ્કર સર્વેશ મહાદેવેતિ સર્વદા ।
અયં દ્વિજાતિમાત્રસ્ય ધર્મોઽત્ર સમુદીરિતઃ ॥ ૧૨૯॥

બ્રહ્મક્ષત્રિયવૈશ્યાનામેષ ધર્મઃ સનાતનઃ ।
શિવક્ષેત્રમિદં જ્ઞેયમરુણાચલનામકમ્ ॥ ૧૩૦॥

અરુણાચલનાથસ્ય ત્રિકાલં કુરુ પૂજનમ્ ।
અશૈવાનાં શિવક્ષેત્રે પ્રવેશો ન યથાતથા ॥ ૧૩૧॥

કુરુ દૈવાદાગતાંસ્તાન્પ્રાણૈરેવ વિયોજય ।
વાજપેયફલં પ્રાપ્યમશૈવાનાં વિનાશને ॥ ૧૩૨॥

શૈવધર્મેષુ સતતં નિષ્ણાતો ભવ સર્વદા ।
ત્ર્યમ્બકેતિ ચ મન્ત્રેણ જપ સામ્બં સદાશિવમ્ ॥ ૧૩૩॥

ત્ર્યમ્બકેતિ ચ મન્ત્રેણ યઃ પૂજયતિ શઙ્કરમ્ ।

સ સર્વાન્ લભતે કામાનિતિ જાબાલવાદિનઃ ॥ ૧૩૪॥

ત્ર્યમ્બકૈકશરણ્યાંસ્તાન્ સામ્બકાનિતિ મન્મહે ।
નિરમ્બકાન્મન્મહે તાંસ્ત્રિયમ્બકપરાઙ્ગમુખાન્ ॥ ૧૩૫॥ ??

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિગૌતમપ્રોક્તં શિવાર્ચનોપદેશં ૧સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૧। ૯૬-૧૩૫॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 21 . 96-135..

Notes:
Ṛṣi Gautama ઋષિ ગૌતમ delivers Upadeśa ઉપદેશ about the procedures of worshiping Śiva શિવ and highlights the importance of Śāmbhavi Dīkṣā શામ્ભવી દીક્ષા. He mentions about the important tithi-s તિથિ and days (vāra વાર) including Kālāṣṭami કાલાષ્ટમી, Ekādashī એકાદશી, Trayodashī ત્રયોદશી, Somavāra સોમવાર, w.r.t. Sita-Asita Pakṣa સિત-અસિત પક્ષ and the meal-timings to be followed.
Ṛṣi Gautama ઋષિ ગૌતમ speaks about the Ṣaḍakṣara mantra ષડક્ષર મન્ત્ર, Rudrādhyāyī રુદ્રાધ્યાયી, worship at Aruṇācaleśvara અરુણાચલેશ્વર; and emphasizes the use of the Tryambaka Mantra ત્ર્યમ્બક મન્ત્ર for worshiping Sāmba SadāŚiva સામ્બ સદાશિવ.

Proofread by Ruma Dewan

---

*Rishigautamaproktam Shivarchanopadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*